अपक्षेपा जङ्घावर्त्ता विद्धा च हरिणप्लुता ।
ऊरुजङ्घान्दोलिता च जङ्घा जङ्घनिका तथा ॥
विद्युत्क्रान्ता भ्रमरिका दण्डपार्श्वेति षोड़श ॥"
अन्ये तु ।
"विभ्रान्तातिक्रान्तापक्रान्ता पार्श्वक्रान्तिका ।
ऊर्द्ध्वजानुर्दोलपादादूत्ता नूपुरपादिका ॥
भुजङ्गत्रासिका चिप्राविद्धा ताला च स्वचिका ।
विद्युत्क्रान्ता भ्रमरिका दण्डपादा तथैव च ॥
आकाशचारिका एताः षोड़शैव निरूपिताः ॥"
एतास्वेव भूमिचारीत्वप्यन्तरभेदोऽस्ति तिर्य्यक्चारी ऊर्द्ध्वचारी अधश्चारीति ता ऊहनीयाः ॥
"तैलाभ्यक्तेन गात्रेण लघ्वाहारो जितश्रमः ।
स्तम्भे वा भित्तिदेशे वा प्रथमं ताः प्रयोजयेत् ॥
रूक्षाहारं तथान्नञ्च भुक्त्वा तां न समाचरेत् ।
वृत्तपादस्य विन्यासश्चारी सैवाभिधीयते ॥
शृङ्गारादिरसानान्तु भवेदुद्दीपनकारणम् ।
माधुर्य्यो भूमना नित्यं छन्दतालत्रयान्विता ॥
नियतोऽङ्गविशेषाणां चारी सञ्चारतो भवेत् ॥"
इति सङ्गीतदामोदरोक्तचारीलक्षणम् ॥

चारुः, पुं, (चरति देवेषु गुरुत्वेन । चर+"दृसनिजनिचरीति ।"उणां १ । ३ । इति ञुण् ।) बृहस्पतिः । (चरति चित्ते इति ।) मनोज्ञे त्रि । इति मेदिनी । रे, ३३ ॥ (यथा, गीतगोविन्दे । १० । ८ । [मधिवचनजातम् ॥"
"इति चटुलचाटुपटुचारुमुरवैरिणो राधिका-
श्रीकृष्णस्य रुक्मिणीगर्भसम्भूतपुत्त्राणामन्यतमः । यथा, हरिवंशे । ११७ । ३६ ।
"चारुञ्च बलिनां श्रेष्ठं सुताञ्चारुमतीं तथा ॥")

चारुकः, पुं, (चारु+संज्ञायां कन् ।) शरबीजम् । अस्य गुणाः । मधुरत्वम् । रूक्षत्वम् । रक्तपित्तकफापहत्वम् । शीतत्वम् । लघुत्वम् । अदृष्यत्वम् । कषायत्वम् । वातकोपनत्वञ्च । इति भावप्रकाशः ॥

चारुकेशरा, स्त्री, (चारूणि केशराणि अस्याः ।) नागरमुस्ता । तरुणीपुष्पम् । इति राजनिर्घण्टः ॥

चारुगर्भः, पुं, (चारुः मनोज्ञः गर्भः अभ्यन्तर्वर्त्त्यन्तःकरणमिति यावत् यस्य । यद्वा चारुगर्भे उत्पत्तिस्थानं यस्य ।) श्रीकृष्णपुत्त्रः । यथा, हरिवंशे । १६० । ६ ।
"चारुभद्रश्चारुगर्भः सुदंष्ट्रो द्रुम एव च ॥"

चारुगुप्तः, पुं, (चारु यथा स्यात् तथा गुप्तः । यद्वा चारुणा ईश्वरेण कृष्णेन गुप्तः पालितः ।) श्रीकृष्णपुत्त्रः । यथा, हरिवंशे । १६० । ६ ।
"सुषेणश्चारुगुप्तश्च चारुविन्दश्च वीर्य्यवान् ॥"

चारुदेष्णः, पुं, रुक्मिण्यां श्रीकृष्णपुत्त्रः । यथा, हरिवंशे । १६० । ५ ।
"द्वितीयश्चारुदेष्णश्च दृष्टिसिंहो महारथः ॥"

चारुधारा, स्त्री, (चारूणां मनोहरपदार्थानां धारा इव, त्रैलोक्यसुन्दरत्वेनाशेषाश्रयत्वम् । चार्व्वी धारा नीतिर्व्यवहारो यस्याः वा ।) शची । इति त्रिकाण्डशेषः ॥ (चारु धाम यस्याः ।) चारुधामा इत्यपि पाठः ॥

चारुनालकं, क्ली, (चारु नालं यस्य कप् ।) रक्तपद्मम् । इति पुरस्मम् ॥

चारुपर्णी, स्त्री, (चारु मनोज्ञं पर्णं पत्त्रं अस्याः ।) प्रसारणी । इति राजनिर्घण्टः ॥ गन्धभादालिया इति भाषा ॥ (प्रसारणीशब्देऽस्या गुणादिकं ज्ञेयम् ॥)

चारुफला, स्त्री, (चारु मनोहरं फलं अस्याः ।) द्राक्षा । इति राजनिर्घण्टः ॥

चारुबाहुः, पुं, (चारू बाहू यस्य ।) श्रीकृष्णपुत्त्रः । यथा, हरिवंशे । १६० । ६ ।
"चारुबाहुः कनीयांश्च कन्या चारुमती तथा ॥"

चारुविन्दः, पुं, (चारु चारुतां बिन्दतीति । बिदि+अण् ।) श्रीकृष्णपुत्त्रः । यथा, हरिवंशे । १६० । ६ ।
"सुषेणश्चारुगुप्तश्च चारुविन्दश्च वीर्य्यवान् ॥"

चारुमती, स्त्री, (चारु चारुता सौन्दर्य्यं अस्या अस्तीति । मतुप् ततो ङीप् ।) रुक्मिण्यां श्रीकृष्णस्य कन्या । यथा, हरिवंशे । १६० । ६ ।
"चारुबाहुः कनीयांश्च कन्या चारुमती तथा ॥"

चारुलोचनः, पुं,(चारुणी लोचनेऽस्य ।) हरिणः । इति त्रिकाण्डशेषः ॥ (चारुलोचनविशिष्टे त्रि ॥)

चारुवर्द्धना, स्त्री, (चारु चारुत्वं श्रियमित्यर्थः वर्द्धयति स्वगुणैरिति यावत् । वृध+णिच्+युच् । कर्त्तरि ल्युर्वा ततष्टाप् ।) नारी । इति राजनिर्घण्टः ॥

चारुव्रता, स्त्री, (चारु व्रतमस्याः ।) मासोपवासिनी । इति त्रिकाण्डशेषः ॥

चारुशिला, स्त्री, (चारुश्चार्व्वी शिला इति नित्यकर्म्मधारयः ।) मणिः । इति त्रिकाण्डशेषः ॥

चार्च्चिक्यं, क्ली, (चर्च्चिकैव । स्वार्थे ष्यञ् ।) चन्दनादिना देहविलेपनविशेषः । इत्यमरः ॥ तत्पर्य्यायः । चर्च्चा २ स्थासकः ३ । इत्यमरः ॥ चर्च्चिक्यम् ४ । इति भरतः ॥ अपि च ।
"स्थासकः स्थायकश्चर्च्चा चर्च्चिक्यञ्च चतुष्टयम् ।
वस्त्रादौ कुङ्कुमादीनां छटादिषु निगद्यते ॥"
इति शब्दरत्नावली ॥

चार्म्मः, पुं, (चर्म्मणा परिवेष्टितः इति । चर्म्म+अण् ।) चर्म्माच्छादितरथः । इति भरतः ॥ चर्म्माच्छन्नद्रव्ये त्रि ॥

चार्म्मणं, क्ली, (चर्म्मणां समूहः इति । भिक्षादिभ्योऽण् ।" ४ । २ । ३८ । इत्यण् ।) चर्म्मसमूहः । इत्यमरटीकायां भरतः ॥

चार्म्मिणं, क्ली, (चर्म्मिणां चर्म्मधारिणां समूहः । इति अण् ।) चर्म्मिसमूहः । इत्यमरटीकायां स्वामी ॥

चार्व्वाकः, पुं, (चारुः आपातमनोरमः लोकचित्ताकर्षकः इति यावत् वाकः वाक्यमस्य । ततः पृषोदरादित्वात् साधुः ।) तार्किकविशेषः । तत्पर्य्यायः । बार्हस्पत्यः २ नास्तिकः ३ लौकायतिकः ४ । इति हेमचन्द्रः ॥ स च आकाशभिन्नभूतचतुष्टयवादी । प्रत्यक्षमेकं प्रमाणमिति चार्व्वाकाः । इति न्यायसंग्रहः ॥ (यथा च सर्व्वदर्शनसंग्रहे ।"अथ कथं परमेश्वरस्य निःश्रेयसप्रदत्वमभिधीयते बृहस्पतिमतानुसारिणा नास्तिकशिरोमणिना चार्व्वाकेण दूरोत्सारितत्वात् दुरुच्छेदं हि चार्व्वाकस्य चेष्टितम् ॥")
दुर्य्योधनसखराक्षसविशेषः । (यथा, महाभारते । १२ । ३८ । २२—२३ ।
"निःशब्दे च स्थिते तत्र ततो विप्रजने पुनः ।
राजानं ब्राह्मणच्छद्मा चार्व्वाको राक्षसोऽब्रवीत् ॥
तत्र दुर्य्योधनसखा भिक्षुरूपेण संवृतः ।
साक्षः शिखी त्रिदण्डी च धृष्टो विगतसाध्वसः ॥")

चार्व्वी, स्त्री, (चारु+गुणवचनत्वात् ङीष् ।) कुवेरपत्नी । ज्योत्स्ना । बुद्धिः । शोभना । इति मेदिनी । वे, ६ ॥ दीप्तिः । इति शब्दरत्नावली ॥

चालः, पुं, (चालयति छादयतीति । चल+णिच्+अच् णो वा । यद्वा चालयति आच्छादयत्यनेनेति । चल+णिच्+करणे घञ् ।) स्वनामख्यातगृहाच्छादनम् । तत्पर्य्यायः । पिटम् २ । इति त्रिकाण्डशेषः ॥ पटलम् ३ छदिः ४ । इत्यमरः । २ । २ । १४ ॥ कटलम् ५ । इति शब्दरत्नावली ॥ छादम् ६ । इति जटाधरः ॥ स्वर्णचूड़पक्षी । इति भूरिप्रयोगः ॥

चालकः, पुं, (चलति स्वेच्छयैव । चल+ण्वुल् ।) अङ्कुशदुर्द्धरहस्ती । इति त्रिकाण्डशेषः ॥

चालनं, क्ली, (चालयत्यनेनेति । चल+णिच्+करणे ल्युट् ।) चालनी । इत्यमरटीकायां भरतः ॥ (यथा, कर्म्मप्रदीपे ।
"सूक्ष्मच्छिद्रसमोपेतं चालनं तितउः स्मृतः ॥"
भावे ल्युट् । प्रेरणम् । यथा, भागवते । ३ । २६ । ३७ ।
"चालनं व्यूहनं प्राप्तिर्नेतृत्वं द्रव्यशब्दयोः ॥")

चालनी, स्त्री, (चालयत्यनेनेति । चल+णिच्+करणे ल्युट् ङीप् च ।) स्वनामख्यातशस्यादिचालनपात्रम् । तत्पर्य्यायः । तितउः २ । इत्यमरः । २ । ९ । २६ ॥ चालनम् ३ बहुच्छिद्रा ४ । इति भरतः ॥ पावीरः ५ । इति जटाधरः ॥

चाषः, पुं, (चाषयति भक्षयति कीटादिकमिति । चष+स्वार्थे णिच्+अच् । यद्वा चष्यते भक्ष्यतेऽसौ मांसाशिभिरिति । चष्+कर्म्मणि घञ् ।) स्वर्णचातकः । सोनाचड़ा इति ख्यातः । नीलकण्ठ इति कश्चित् ख्यातः । इत्यमरटीकायां भरतः ॥ तत्पर्य्यायः । किकीदिविः २ नीलाङ्गः ३ पुण्यदर्शनः ४ । इति राजनिर्घण्टः ॥

चासः, पुं, (चाष+पृषोदरात् सत्वम् ।) चाषपक्षी । इक्षुः । इति मेदिनी । से, ३ ॥

चि, ञ चिञाम् । चयने । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-द्विकं-अनिट् ।) ञ, चयति चयते धनं लोकः । इति दुर्गादासः ॥

चि, ञ न चिञाम् । इति कविकल्पद्रुमः ॥ (स्वां-उभं-द्विकं-अनिट् ।) चितिश्चयनं राशीकरणमिति यावत् । न ञ, चिनोति चिनुते । इति दुर्गादासः ॥